श्रीकृष्णेन गीतायां प्रतिपादितं यत्, शरीरमेव
नष्टं भवति, न तु आत्मा। यस्य मनुष्यस्य जन्म भवति
तस्य मृत्युरपि ध्रुवमिति, सर्वकर्तव्यपालनं मानवस्य परमं
कर्तव्यम्। कर्तव्यपालनेन एव जीवनस्य साफल्यं सिद्ध्यति।
कर्म केवलं कर्तव्यबुद्ध्या एव करणीयम्, तत्र फलासक्ति-
र्नैव विधेया। निष्कामकर्मयोगः करणीयम्। गीतायां भगवान्
श्रीकृष्णः सर्वान् धर्मान् त्यक्त्वा स्वकीये शरणे आगमनाय
उपदिशति।

इत्येतस्य अवलोकनेन निश्चप्रचम् एतत् सिध्यति
यत्, गीतायां सर्वेषां दर्शनानाम् उपनिषदां च सारः
प्रस्तूयते। कर्मक्षेत्रे अवतीर्णाः जनाः गीतायाः स्वा-
ध्यायं कृत्वा स्वकर्तव्यम् प्रत्युत्साहवन्तः विपदि धैर्यवन्तः,
सततं विवेकवन्तः च जायन्ते। इयं गीता निराशायाम्
आशायाः सञ्चारिका उपदेशकार्यनिवृत्ते सन्देशवाहिका
विद्यते।

—— o ——